[1]प्रनष्टम्-[A]प्रनष्टः-नष्टवान्, प्रणाशितः, निनशिषितः, निनङ्क्षितः-नानशितः, तवान् ;

नशः, [2]विनाशी, [B]कृतनाशी, [3]विनाशकः, [4]नश्वरः[C]-नश्वरी, नाशः, [5]चितविनाशनः-वित्तनाशनः-निनङ्क्षुः, नानशः ;

नशितव्यम्-नंष्टव्यम्, नाशयितव्यम्, निनशिषितव्यम्-निनङ्क्षितव्यम्, नानशितव्यम् ;

नशनीयम्, नाशनीयम्, निनशिषणीयम्, निनङ्क्षणीयम्, नानशनीयम् ;

नाश्यम्, नाश्यम्, निनशिष्यम्-निनङ्क्ष्यम्, नानश्यम् ;

ईषन्नशः-दुर्नशः-सुनशः, [6]दूणाशः ; — —

नश्यमानः, नाश्यमानः, निनशिष्यमाणः-निनङ्क्ष्यमाणः, नानश्यमानः ;

नाशः, नाशः, निनशिषः-निनङ्क्षः, नानशः ;

नशितुम्-नंष्टुम्, नाशयितुम्, निनशिषितुम्-निनङ्क्षितुम्, नानशितुम् ;

नष्टिः[7]जीवनक्, नाशना, निनशिषा-निनङ्क्षा, नानशा ;

---

1. वलादेरार्धधातुकस्य 'रधादिभ्यश्च' (7-2-45) इतीड्विकल्पनात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः।

2. 'सुप्यजातौ —' (3-2-78) इति ताच्छील्ये णिनिः।

3. 'निन्दहिंसक्लिशखादविनाश—' (3-2-146) इत्यादिना तच्छीलतद्धर्मतत्साधुकारिषु वुञ्। अकादेशः।

4. 'इण्नशिजि—' (3-2-163) इति तच्छीलादिषु कर्तृषु क्वरप्। स्त्रियां 'टिड्ढा—' (4-1-15) इति ङीप्।

5. चित्तं विनाशयतीति, वित्तं नाशयतीति च चित्तविनाशनः, वित्तनाशनः। नन्द्यादित्वात् (3-1-134) ण्यन्तात् कर्तरि ल्युः। कर्मण्यणोऽपवादः।

6. दुःखेन नाशयितव्यः=दूणाशः। 'ईषत्—' (3-3-126) इत्यादिना ण्यन्तात् खल्। 'दुरो दाशनाशदभध्येषु उत्वम्, उत्तरपदादेः ष्टुत्वं च' (वा. 6-3-109) इति वचनेन उपसर्गान्त्यस्योत्वम्, सवर्णदीर्घः, उत्तरपदादेः ष्टुत्वं च।

7. जीवो नश्यतीति, जीवं नाशयति, इति वा जीवनक्=आहुतिविशेषः। बाहुलकादत्र स्त्रियाम् अर्थविशेषे क्विप उपपत्तिः।

A. 'वियुत्प्रणाशं स वरं प्रनष्टो यद्वोर्ध्वशोषं तृणवद्विशुष्कः।' भ. का. 3.14.

B. 'कुर्मश्च जीविते बुद्धिं धिक् तृष्णां कृतनाशिनाम्॥' भ. का. 18.32. (मल्लिनाथसम्मतपाठानुसारेण णिनिप्रत्ययान्ततया लिखितम्।)

C. 'रद्धारये सोऽयमनश्वराय तृप्यम्मना दत्तजनद्रुहेऽस्मै।' धा. का. 2.64.